This question paper contains 4+1 printed pages]

**Roll No.** | | | | | | | | | | | |

S. No. of Question Paper : **7829**

Unique Paper Code : **62131117** **GC**

Name of the Paper : **Nīti Literature**

Name of the Course : **B.A. (Prog.) Sanskrit Language—C**

Semester : **I**

Duration : **3 Hours** Maximum Marks : **75**

*(Write your Roll No. on the top immediately on receipt of this question paper.)*

(इस प्रश्न-पत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमांक लिखिए ।)

**Note :** Unless otherwise required in a question, answers should be wirtten in **Sanskrit** or in **Hindi** or in **English**; but but the same medium should be used throughout the paper.

**टिप्पणी :** अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत या हिन्दी या अंग्रेज़ी किसी एक भाषा में दीजिए; लेकिन सभी उत्तरों का माध्यम एक ही होना चाहिए ।

Answer *All* questions.

सभी प्रश्नों के उत्तर दीजिए ।

**भाग 'क'**

**(Part 'A')**

1. निम्नलिखित का अनुवाद कीजिए : 6+6=12

Translate the following :

(क) तत्र च गत्वा खादिरमयं लकुटं सज्जीकृत्य कपाटयुगलं द्वारे समाधाय सार्धप्रहरदिवससमये भूयोऽपि विहारद्वारमाश्रित्य सर्वान्क्रमेण निष्क्रामतो गुरुप्रार्थनया स्वगृहमानयत् । तेऽपि सर्वे कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान्परित्यज्य प्रहृष्टमनसस्तस्य पृष्ठतो ययुः ।

P.T.O.

**अथवा**

*(Or)*

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परं मित्रभावमुपगता वसन्ति स्म । तेषां त्रयः शास्त्रपारंगताः परन्तु बुद्धिरहिताः । एकस्तु बुद्धिमान्केवलं शास्त्रपराङ्मुखः । अथ तैः कदाचिन्मित्रैः मन्त्रितम् । को गुणो विद्याया येन देशान्तरं गत्वा भूपतीन्परितोष्यार्थोपार्जना न क्रियते ।

(ख) भो मित्र किमद्य चिरवेलया समायातोऽसि । कस्मात् साह्लादं नालपसि । न सुभाषितानि पठसि । स आह-मित्र अहं तव भ्रातृजायया निष्ठुरतरैर्वाक्यैरभिहितः-भो कृतघ्न मा मे संमुखं मुखं दर्शय यतस्त्वं मित्रं नित्यमेवोपजीव्यागच्छसि । तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेणापि न करोषि ।

**अथवा**

*(Or)*

तद्गत्वा तत्सकाशं कुत्रचिज्जलाशयेऽन्विष्य मम सन्देशं कथय । यदागम्यतामेकाकिनापि भवता द्रुततरं यद्यन्ये मण्डूका नागच्छन्ति । अहं त्वया विना नात्र वक्तुं शक्नोमि । तथा यद्यहं तव विरुद्धमाचरामि तत्सुकृतमन्तरे मया विधृतम् ।

2. निम्नलिखित की सप्रसङ्ग व्याख्या कीजिए : 8

Explain the following with reference to context :

अयं निजः परो वेति गणना लघुचेतसाम् ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

**अथवा**

(*Or*)

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः ।

अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः ॥

3. पञ्चतन्त्र के आधार पर गङ्गदत्तमण्डूककथा **अथवा** मूर्खपण्डितकथा का सारांश लिखिए । 10

Write a summary of Gaṅgadatta-maṇḍūkakathā *or* Mūrkhapaṇḍita-kathā on the basis of Pancatantra.

**भाग 'ख'**

**(Part 'B')**

4. निम्नलिखित का अनुवाद कीजिए : 6

Translate the following :

प्रसह्य मणिमुद्धरेन्मकरवक्त्रद्रंष्ट्रान्तरात्

समुद्रमपि संतरेत् प्रचलदूर्मिमालाऽऽकुलम् ।

भुजङ्गमपि कोपितं शिरसि पुष्पवत् धारयेत्

न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥

**अथवा**

(*Or*)

साहित्यसंगीतकलाविहीनः

साक्षात्पशुः पुच्छविषाणहीनः ।

तृणं न खादन्नपि जीवमान-

स्तद्भागधेयं परमं पशूनाम् ॥

7+7=14

5. निम्नलिखित की सप्रसङ्ग व्याख्या कीजिए :

Explain the following with reference to context :

(क) अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा ।

विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥

**अथवा**

(*Or*)

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।

ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥

(ख) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम् ।

विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥

**अथवा**

(*Or*)

2. प्रारभ्यते न खलु विघ्नभयेन नीचैः

प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।

विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः

प्रारब्धमुत्तमजनाः न परित्यजन्ति ॥

6. विद्वत्प्रशंसा के विषय में भर्तृहरि के विचारों का प्रतिपादन कीजिए । 10

Describe the views of Bhartrhari regarding praise of scholars.

अथवा

(*Or*)

नीतिशतकम् के आधार पर सज्जनों की संगति के सुपरिणामों का विवेचन कीजिए ।

Discuss the advantages of company of noble persons on the basis of Nitishatakam.

## भाग 'ग'

## (Part 'C')

7. निम्नलिखित में से किन्हीं तीन पर टिप्पणी लिखिए : 5+5+5=15

Write notes on any *three* of the following :

कालिदास के नाटक, भारवि, कादम्बरी, नाटककार भास, उत्तररामचरितम् ।